
# 2 खेलमहोत्सवः




विवेकानन्दस्य विद्यालये खेलमहोत्सवः प्रचलति। बालकाः प्रसन्नाः सन्ति। सर्वे कौशलस्य प्रदर्शनं कर्तुम् इच्छन्ति। कुत्रचित् धावनस्पर्धा चलति। बालकाः प्रयत्नपूर्वकं शीघ्रतया धावन्ति। कतिपयबालकाः उच्चैः वदन्ति 'धावतु धावतु त्वरितं धावतु।'

कुत्रचित् गोलक्षेपकस्पर्धा चलति। क्रमशः क्रीडकः लोहगोलकं क्षिपति।

कुत्रचित् कबड्डी चलति। कुत्रचित् क्रीडकः दीर्घलङ्घनं करोति। सम्यक्तया सर्वाः स्पर्धाः पूर्णाः भवन्ति।

समापनकार्यक्रमस्य प्रारम्भः भवति। विद्यालयस्य आचार्यः स्व-स्थानतः उत्तिष्ठति वदति च ''खेल महोत्सवे आगतानां प्रतिभागिनानां कृते अभिनन्दनम्। एषः अस्माकं प्रथमः खेलमहोत्सवः। अस्माकं शालायाम् अस्मिन् वर्षे नूतनः शिक्षकः नियुक्तः अस्ति। एतत् सर्वं तस्य प्रयासस्य फलम्। तमपि अभिनन्दनम्। अधुना अस्माकं विद्यालये व्यायामस्य प्रशिक्षणार्थं प्रशिक्षकः अपि अस्ति। सः प्रशिक्षणं दास्यति। अद्यारभ्य अस्माकं शालायां प्रतिवर्षं खेलमहोत्सवः भविष्यति। अस्माकं छात्राः राज्यकक्षायाः राष्ट्रकक्षायाः च खेलमहोत्सवेषु भागं ग्रहीष्यन्ति। अस्माकं शालायाः नाम उज्ज्वलं भविष्यति। जीवने खेलस्य महत्त्वम् अस्ति। खेल सर्वांगिणविकासार्थं साहाय्यं करोति।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

## Glossary

**चलति** – is going on **प्रसन्नाः** – pleased **कौशलस्य** – of the skill **धावनस्पर्धा** – race **शीघ्रतया/त्वरितम्** – fast **धावन्ति** – are running **कतिपय** – some **उच्चैः** – loudly **धावतु** – run **गोलक्षेपकस्पर्धा** – shout-put **लोहगोलकम्** – iron-ball **दीर्घलङ्घनम्** – long jump **सम्यक्तया** – well **प्रारम्भः** – beginning **स्व-स्थानतः** – from one's seat/place **आगतानाम्** – of those who have come **प्रतिभागिनानाम्** – of the participants **कृते** – for (someone) **ग्रहीष्यन्ति** – will participate **उज्ज्वलम्** – bright

## Exercise

**1. Frame sentences following the illustration :**

**Illustration :** धावकः शीघ्रं धावति। – धावकाः शीघ्रं धावन्ति।

(1) मानवः क्रीडां पश्यति।

(2) गजः मन्दं चलति।

(3) बालकः शीघ्रं गच्छति।

(4) महिला श्लोकं गायति।

**2. Answer the following questions :**

(1) विवेकानन्दस्य विद्यालये किं चलति ?

(2) धावकाः किं कुर्वन्ति ?

(3) विद्यालये काः काः क्रीडाः चलन्ति ?

(4) जीवने कस्य महत्त्वम् अस्ति ?

(5) खेलः कस्यार्थे साहाय्यं करोति ?

**3. Transform sentences following the illustration :**

**Illustration :** राधा आगच्छति। राधा आगमिष्यति।

(1) शबाना वदति। ________________।


(2) मोहसीना चलति। ________________।

(3) रमेशः खादति। ________________।

(4) वेदः कथयति। ________________।



Get More Learning Materials Here : CLICK HERE www.studentbro.in



4.

- **Colour the above picture and frame sentences based on it :**

(1) ____________________

(2) ____________________

(3) ____________________

(4) ____________________

(5) ____________________

**5. Pronounce the following words correctly about the game.**

(1) शीघ्रतया (2) त्वरितम् (3) कुत्रचित् (4) गोलक्षेपः (5) दीर्घलङ्घनम् (6) अद्यारभ्य (7) प्रशिक्षणम्

**Activity**

- Make a list of games that you play in the street with your friends :



Get More Learning Materials Here : CLICK HERE www.studentbro.in